# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 4 | गुणाः – ५० |
| विषयः – पौरोहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – ब्रह्मनित्यकर्मसमुच्चयः, पुराणोक्तकर्मदर्पणम्, कर्मकौशलम् | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्या कार्या ।**

१ सिन्धुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनम् ।
विदेशगमनं चैव न कुर्याद् गर्भिणी पतिः ॥

२ प्रथमे सप्तमे मासि अष्टमे दशमेऽपि वा ।
द्वादशे च तथा कुर्यात्कर्णवेधं शुभावह ॥

३ षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् ।
ब्रह्मचार्येव पर्वण्याध्याश्चतस्रश्च वर्जयेत् ॥

**प्रश्नः २ कस्यापि एकस्य विस्तृतमुत्तरं लिखत ।**

१ अन्नप्राशनविधिः ।
२ निष्क्रमणसंस्कारविधिः ।

**प्रश्नः ३ कस्यापि एकस्य वर्णनं कुरुत ।**

१ गर्भिणीधर्माः ।
२ ब्रह्मचारिणः धर्माः ।

**प्रश्नः ४ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्वत्वाच्चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥

२ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

३ कुलं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथतां च ।
एतान्गुणान्सप्तपरीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥

**प्रश्नः ५ कस्यचिदेकस्य समीक्षा कार्या ।**

१ वाग्दानप्रयोगः ।
२ समावर्तनसंस्कारः ।

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत।**

१ सप्तपदी।

२ यज्ञोपवीतविधिः।

**प्रश्नः ७ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या।**

१ एकदा नैमिषारण्ये ऋषयः शौनकादयः।
प्रपच्छुः मुनयः सर्वे सूतं पौराणिकं खलु॥

२ अथान्यत्संप्रवक्ष्यामि कृतं येन पुरा द्विज।
कश्चित्काशीपुरे रम्ये ह्यासीद् विप्रोऽतिनिर्धनः॥

३ यात्रां तु कृतवान् साधुर्मङ्गलायनपूर्विकाम्।
ब्राह्मणाय धनं दत्वा तदा तु नगरं ययौ॥

**प्रश्नः ८ सत्यनारायणकथायाः सारांशं लिखत। अथवा**
**श्रावणीप्रयोगे सप्तर्षिणां विधिं समन्त्रकं विवेचयत।**

**प्रश्नः ९ एकस्य निबन्धात्मकमुत्तरं लिखत।**

१ ऋषितर्पणम्।

२ दशविधस्नानम्।

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत।**

१ कति संस्काराः सन्ति ?

२ जन्मदिवसे कः विधिः भवति ?

३ निष्क्रमणे कस्य देवस्य दर्शनं भवति ?

४ चूडाकरणस्य कालः कः ?

५ कस्मिन् वर्षे विद्यारम्भो भवति ?

६ मरणान्ते कः संस्कारः भवति ?

७ अन्नप्राशनं कदा भवति ?

८ कतिवारं भिक्षाचरणं करणीयम् ?

९ लाजाहोमः कस्मिन् संस्कारे भवति ?

१० सत्यनारायणकथायां कति अध्यायाः सन्ति ?

११ ब्राह्मणस्य उपनयनकालः कः ?

१२ आदर्शदर्शनं केन न कर्तव्यम् ?

१३ जन्मनः पूर्वं कति संस्काराः भवन्ति ?

१४ जातकर्मसंस्कारः कदा भवति ?

१५ वरस्य कृते कस्य ग्रहस्य बलं श्रेष्ठं भवति ?

****